National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(59): 219-220
© 2025 NJHSR
www.sanskritarticle.com

**डा.निराकार सामन्तरायः**
पुराणेतिहासविद्याशाखा,
पूर्व शोधछात्र, राष्ट्रीयसंस्कृतविश्व-
विद्यालयः, तिरुपति

**Correspondence:**
**डा.निराकार सामन्तरायः**
पुराणेतिहासविद्याशाखा,
पूर्व शोधछात्र, राष्ट्रीयसंस्कृतविश्व-
विद्यालयः, तिरुपति

# राष्ट्रहिताय संस्कृतशास्त्रीयाभिप्रायः

**डा.निराकार सामन्तरायः**

शास्त्रमित्यस्य अर्थः अनुशासनम् इति। 'शासु अनुशिष्टौ' इत्यस्मात् धातोः निष्पन्नोऽयं शब्दः। सम्पूर्णमानवकुलस्य अनुशासनात्मकं शास्त्रं वेद एव। स च वेदः प्रभुसंहिता मन्यते। अनन्तरे वेदानां सारल्यं रूपं पुराणं अष्टादशभागेषु उपपुराणादिभिः परिचीयते। तत् साक्षात् लोकोपकारकं पुराणशास्त्रं सुहृन् संहिता इति गृह्यते । वेदोदितानां विषयाणां विवरणाय स्पष्टप्रतिपत्तये च महर्षिभिः प्रवर्तितानि अङ्गोपाङ्गानि शास्त्राणि। तथा च अपौरुषेयं शास्त्रं वेदः। पौरुषेयञ्च अङ्गोपाङ्गादिकं लौकिकशास्त्रम्। शास्त्राणि जीवनधर्मान् जीवनया-पनप्रकारान् च अनुशासति। यावत् शास्त्रोपदिष्टमार्गे मानवाः प्रावर्तन्त तावत् लोकोऽपि सुखी आसीत्। यदा शास्त्ररूपस्य धर्मस्य ग्लानिरजायते तदा जीवनमपि समस्यासम्पन्नाजायत। सरलजीमनस्य धर्मस्य च पुनः संस्थापनार्थं शास्त्रशिक्षणस्य पुनरुद्धारः समपेक्ष्यते। परन्तु शास्त्रशिक्षणे तत्प्रचारे च वहवः समस्याः दृश्यन्ते।

एषः समाह्वः प्रधानः अस्माभिः पुनरीक्षणीयः अभिमुखीकरणीयश्च। शास्त्रसंरक्षणे प्रचारे च महान् समादृत्व अभिमुखीक्रियते । एतेन न केवलं शास्त्राणां हानिः, परन्तु सम्पूर्णमानवतायाः एव हानिः अवलोक्यते ।

यावान् भौतिकवादः विकासं प्राप्नुयात् तावान् शास्त्राणां ह्रासः संरक्षणाभावश्च । शास्त्राणां हानिः स्यात्, संरक्षणं च न भवेत् इति न कश्चित् नियमः। किञ्च भौतिकवादस्य शास्त्रसंरक्षणं न विरुद्धं, तेन शास्त्रप्रचारः न भवेत् इति धारणा दोषपूर्णा । अर्थेन सह धर्मोऽपि वर्धेत, तदर्थं शास्त्रं संरक्षितं स्यात् । शास्त्रेण होनः धर्महीनः भवति। धर्मेणहीनः पशुभिः समानः भवति । अतः धर्मसंस्थापनार्थाय शास्त्रसंरक्षणं नितरामपेक्षते। यदि शिक्षायाः ध्येयः धर्मो न भवति सदाचारप्रवर्तनं च न, तदा तादृशी शिक्षा या च सवलाम् अर्थपरा, माध्वी कथं भवितुमर्हति सा च निरर्था व्यर्था एव स्यात्।

आधुनिकयुगे ज्ञानम्य प्रचाराय प्रसाराय च विद्याविषयकं यथार्थतत्वम् अवश्यमेव ज्ञातव्यम्। यतो हि यथार्थतत्वं विज्ञाय एव मानवः क्रियाशीलो भवति। इयं क्रियाशीलता लोकहिताय प्रेरयति। तस्य चिन्तने औदार्यं वर्धते। शनैः शनैः तस्य जीवनम् ऊर्ध्वगतिं प्रति याति।

**प्रसिद्धमेकम् आभाणकं विद्यते-**

**"यदि विद्या केवलम् उदरपूरणाय तर्हि भिक्षायां को दोषः"**

भारतीय जीवनस्य विशिष्टता मिथ्याचारेषु नास्ति। भारतीयजीवनं सर्वदा परमार्थं व्यनक्ति। परमार्थमेव अस्माकं जीवनस्य परमम् उद्देश्यं भवेत् ज्ञानम्। बुद्धिमान् सर्वदा सारं विजानीयात्।

आधुनिकसमाजस्य विकासाय राष्ट्रस्य कल्याणाय च संस्कृतशास्त्रस्य अध्ययनाध्यापनकार्यं विद्यापीठेषु अनिवार्यं स्यात्। छात्राणां सर्वाङ्गीणविकासः मुख्योदेश्यं वर्तते। अध्यापनाव्यवस्थायां छात्रसौविध्याय कौशलानां प्रयोगः स्यात्। छात्रेषु ज्ञानपटवत्वपरीक्षायै आकलनमूल्याङ्कनयोः कार्यं सम्यक्तया करणीयम्।

**आकलनं नाम -** छात्राणां कृते प्रदत्तानि कार्याणि।

**मूल्याङ्कनं नाम -** कार्याधारेण दीयमानं प्राप्ततथ्यस्य परिणामः वर्तते। यत्र छात्रस्य समग्रशिक्षा निहिता। इयं प्रक्रिया दीर्घकालीकी वर्तते।

**प्राचीनशिक्षापद्धतिः-**

गुरुकुलपद्धतौ शलाकापरीक्षणमाध्यमेन छात्राणामाकलन-मूल्याङ्कनकार्यद्वयं निहितम्। प्राचीनकाले अनया परीक्षया मूल्याङ्कनकर्ता गुरुः तावत्कालपर्यन्तं शिष्यमुखात् उत्तरं शृणोति यावत्कालपर्यन्तं तस्य गुरोः सन्तुष्टिः न जाता। शलाकाधारेण पुनः द्वितीयचरणस्वरूपं शास्त्रार्थं करणीयम्। तुष्टिप्रदोत्तरदापनाय छात्रस्य प्रयासोऽपि तथैव नैरन्तर्येण आसीत् धाराप्रवाहः। जनाः विजेतारं तादृशं पुरुषं शलाकापुरुषमपि अवोचन्। पुराणपृष्ठं यदि पश्यामश्चेत् रामकृष्णयोः, प्रहलादस्य, उद्धवस्य गोपीनाञ्च परीक्षासम्बद्धाकलन-मिल्याङ्कनपद्धतीरपि सम्यगासीत्। एतेषु रामकृष्णयोः गुरुकुलपद्धतिः चतुषष्टि-दिवसव्यापिनी आसीत्। विशिष्टछात्रयोः हेतोः स्वल्पकाला-भ्यान्तरे विशालसंस्कृतवाङ्मयस्य वारिधिसन्तरणार्थं समाप्तं जातम्। अधः श्लोकांशः स्पष्टयति;

अतः-

**"समन्व्य पत्न्या स महार्णवे मृतं**
**बालं प्रभासे वरयाम्बभूव ह॥"**

(भाःम/10/45/37)

विद्यादानादनन्तरं गुरुः रामकृष्णाभ्याम् आकलनाय एकां परियोजनां दत्तवान्। प्रभासतीर्थस्य महार्णवात् मृतपुत्रस्य पुनः जीवितरूपेण प्रत्यावर्तनमिति आकलनमासीत्। अनया परि-योजनया तयोः उपयोगकरणस्य प्रक्रियासिद्धा। एषा प्रक्रिया गुरुदक्षिणास्वरूपासीत्। अनेन मूल्याङ्कनेन सफलीभूतौ रामकृष्णौ आस्तामिति अधः श्लोकेनानेन ज्ञायते।

**नवीनपरीक्षापद्धतिः-**

साम्प्रतिककाले शास्त्रसंरक्षणाय प्राचीनपरम्परा शिक्षापद्धतौ परिवर्तनवशान् विलुप्ता। परिणामस्वरूपः सम्प्रतिः प्राचीन-शास्त्रज्ञाताव्याख्यातृणां नैतन्तर्येण विघटनं वर्तते, एवञ्च भारतीयशास्त्रसंरक्षणमपि चिन्तायाः विषयोऽपि। सम्प्रतिः आधु-निकयुगे यतो हि सीमितजनेषु आवद्धा न, एतदर्थमन्त-र्जालीयव्यवस्था विश्वं गवाक्षेव संस्कृतशास्त्रीयशिक्षा प्रचल-न्नस्ति। दूरस्थसन्निकटशिक्षयोर्माध्यमेन क्षेत्रं विस्तृतम्।

**संस्कृतशास्त्रीयाभिप्रायः-**

प्राचीनकालादारभ्याद्यावधिपर्यन्तं समाजसंस्काराय नैतिक-मूल्यबोधपूर्णसंस्कृतशास्त्रमस्मान् शासति। तात्कालीकस्थित्यां शास्त्रसाधनया दिव्यदृष्टिमाध्यमेन ऋषिमुनिभिः प्रदर्शितमार्ग-मनुसृतवन्तः। इदानीन्तनसमाजे युगप्रभावान् अन्तजातीय-व्यवस्थया अध्ययन-अध्यापन- मूल्याङ्कनकार्याणि प्रचलन्त सन्ति। परन्तु आचार्यरूत्तरात् अनुमितिकरणकार्यं सम्यकृतया करणीयम्। समुन्नतराष्ट्रसंगठनाय प्राचीननवीनयोः आधारेण संस्कृतशास्त्रस्य रक्षा अनिवार्या। शिक्षणपद्धतौ सदैव आकलन-मूल्याङ्कन-परीक्षासम्बद्धेषु सम्प्रत्ययेषु शलाकापरीक्षणस्य योगः स्यात्। अनेन स्मृतिशक्तेर्ह्रासो न भविष्यति, तेन सह सङ्कणकीय व्यवस्थापि ग्राह्या नोचेत् शास्त्रविद्यायाः विस्तारः न भविष्यति। संस्कृतशास्त्रीयशिक्षा सदैव राष्ट्रहिताय जागर्ति। शिवेतरेक्षतये इयं प्रक्रिया सदैव आवश्यकीति मे मतिः।

**सन्दर्भग्रन्थसूची-**

1. श्रीमद्भागवतमहापुराणम्
2. शिक्षामनोविज्ञानम्